This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित सग्रह E

दाखल.क्र. M-2654 विषय.....

नाव अनुस्मृती

लेखक/लिपीकार.....

पृष्ठ 11 काळ - पुर्ण/ अपुर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीकृष्णायनमः ॥ शतानिक उवाच ॥
महाव्रतेमहाप्राज्ञसर्वशास्त्रविशारद ॥ ॥
अक्षीणकर्मबंधस्तु पुरुषोद्विजसत्तम ॥ १ ॥
मरणेयंजपेत्जाप्यंपंचभावमनुस्मरन्।
परंपदमवाप्नोतितन्मेब्रूहिपितामह ॥ २ ॥
॥ शौनक उवाच ॥ इदमेवमहाराजनृपस्य
वांस्तेपितामह ॥ भीष्मंधर्मविदांश्रेष्ठंधर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ०

पुत्रोयुधिष्ठिरः॥२॥ युधिष्ठिरउवाच॥श्री
वत्सांकंजगद्बीजमनंतंलोकसाक्षिणं॥पु
राणनारायणंदेवंनारदःपर्य्यपृछत॥४॥
नारदउवाच॥भगवन्भूतभव्येशश्रद्धा
नैर्जितेंद्रियैः॥कथंभक्तैर्विचिंत्योसिमरणो
पर्युपस्थितैः॥५॥किंवानित्यंजपेज्जाप्यंप्रात
रुत्थायमानव॥स्वप्नेबिबुद्धोध्यायेच्चतन्मे ब्रू

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिजनार्दन ॥ ६ ॥ श्रुत्वा तस्य तु देवर्षे वाक्यं
वाक्यं वाक्यविशारद ॥ प्रोवाच भगवानेको
नारदं जगतां पतिं ॥ ७ ॥ श्रीभगवानुवाच ॥
हंत ते कथयिष्यामि मुनेर्दिव्यं मनुस्मृतिं ॥
मरणे या मनुस्मृत्वा प्राप्नोति परमां गतिं ॥ ८ ॥
ॐकारमादिं कृत्वा मामनुस्मृत्वा चात्म
ना ॥ एकाग्रप्रयतो भूत्वा इमं मंत्रमुदीरये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र॥ ९॥ ॐ नमोभगवतेवासुदेवाय॥
अनंतंशाश्वतंदिव्यमव्यक्तंपुरुषोत्तमं॥
प्रपद्येप्रांजलिंविष्णुमच्युतंपरमेश्वरं॥१०॥
पुराणंपुरुषंविष्णुमनंतंलोकसाक्षिणं॥
प्रपद्येपुंडरीकाक्षमीसंभक्तानुकंपिनं॥
११॥ लोकनाथंसहस्राक्षमक्षरंपरमंपदं॥
भगवंतंप्रपन्नोस्मिभूतभव्यंभवत्प्रभुं॥१२॥

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रष्टारंसर्वलोकानांमनंतंबलपौरुषं॥प
द्मनाभंहृषीकेशंप्रपद्येसत्यमव्ययं॥१३॥
हिरण्यगर्भंभूगर्भंममृतंविश्वतोमुखं॥
प्रभाकरमनाद्यंतंप्रपद्येभास्करद्युतिं॥१४॥
सहस्रशिरसंदेवंवैकुंठंतार्क्ष्यवाहनं॥प्रप
द्येसूक्ष्ममचलंवरेण्यमभयप्रदं॥१५॥नारा
यणंनारसिंहंयोगात्मानंसनातनं॥शरण्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.

सर्वभूतानांप्रपद्येध्रुवमीश्वरं॥१६॥अव्य
क्ताव्यक्तमुत्पन्नमव्यक्ताद्यःपरंप्रभुः॥न
स्मात्परतरंनास्तितमस्मिशरणंगतः॥१७॥
चिंतयंतोहियंनित्यंब्रह्मेशानारदःप्रभुः॥
निश्चयंनाधिगछंतितमस्मिशरणंगतः॥
१८॥जितेंद्रियमहात्मानोज्ञानध्यानपरा
यणाः॥यंप्राप्यननिवर्तंतेतमस्मिशरणंग

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः॥१९॥ यः प्रभुः सर्वभूतानां येन सर्वमि
दं ततं॥ चराचरगुरुर्देवः स मे विष्णुः प्रसी
दतु॥२०॥ राकासेन जगत्सर्वं यो वशभ्यस्थितः
प्रभुः॥ अग्राह्यो निर्गुणः शास्ता तमस्मि शार
णं गतः॥२१॥ यस्माज्जातः पुरा ब्रह्मा पश्चयो
निः प्रजापतिः॥ प्रसीदतु स मे वीष्णुपिताम
हपरः प्रभुः॥२२॥ यः पुरा प्रलये प्राप्ते नष्टेलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.

केचराचरे॥एकस्तिष्ठतियोगात्मासमेवि
ष्णुः प्रसीदतु॥२३॥चतुर्भिश्चचतुर्भिश्चद्वा
भ्यांपंचभिरेवच॥ह्युपयेचपुनर्द्वाभ्यांतस्मै
यज्ञात्मनेनमः॥२४॥दिवाकरस्यसोमस्य
हिमध्येपंचव्यवस्थितं॥क्षेत्रज्ञमितिप्राहु
समहात्माप्रसीदतु॥२५॥अथयस्मिन्महा
त्माचतुर्विज्ञेयः सनातन॥आस्थितः प्रकृ

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिंभुंक्तेप्रकृतिबहुधागुणैः॥मनोगुणंचयो
भुंक्तेसमहात्माप्रसीदतु॥२७॥सांख्ययोग
श्चयोगात्मासाध्यश्चैवमहर्षयः॥यंविदित्वा
विमुच्यंतेसमहात्माप्रसीदतु॥२८॥ग्रामीग
र्भस्ययोगर्भस्तस्यगर्भस्ययोरिपुः॥रिपुग
र्भस्ययोगर्भसमेविष्णुः प्रसीदतु॥२९॥
यस्यहस्तेगदाचापंगरुडोयस्यवाहनं॥शं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.

खचक्रगदापद्मंसमेविष्णुप्रसीदतु ॥३०॥ च
तुर्मूर्तिपरंधामलक्ष्मिवासोचरार्चितः॥सर्वा
हिवासनाद्योसिवासुदेवनमोस्तुते ॥३१॥ यो
गावासनमस्तुभ्यंसर्वावासकरप्रदः॥सर्व
वासनमस्तेस्तुसाक्षिभूतोह्यवस्थिते ॥३२॥ अ
तिंद्रियनमस्तेस्तुभ्यंलिंगेस्वमनुगीयते॥तेतु
भ्यंनाभिजानंतिसंसारेसमरंतिते ॥३३॥ अ

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जेयः खंडपरशुर्विश्वमूर्तिर्दृषाकपिः ॥ त्रि
गुणेपंचकालायनमस्तेज्ञानसागरः ॥ ३४
नमस्तेसर्वतोभद्रसर्वतोक्षिशिरोमुखं ॥ नि
र्विकारनमस्तेस्तुसाक्षीभूतजगत्पते ॥ ३५ ॥ न
मस्तेपुंडरीकाक्षपुनरेवनमोस्तुते ॥ ईश्वरोसि
जगन्नाथकिमतःपरमुच्यते ॥ ३६ ॥ रागद्वे
षविनिर्मुक्तोलोभमोहविवर्जितः ॥ अशारी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.

रः शरीरस्थसमः सर्वेषुदेहिषु ॥ ३७ ॥ अव्य
क्तबुध्यहंकारमात्रभूतेंद्रियाणि च ॥ त्वयिता
निनतेषुत्वंतेषुत्वंतानिनत्वये ॥ ३८ ॥ स्रष्टाभो
क्तासिकूटस्थोगुणानांप्रभुरीश्वरः ॥ प्रकृत्या
हेतुरहितः प्रभुरात्मावस्थितः ॥ ३९ ॥ भक्त्या
नांयोहिदेवस्त्वंत्वंधामस्तुनरोत्तमं ॥ समोभूते
षुसंयोगोनपुनर्भवजन्मनी ॥ ४० ॥ नाहंकारे

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णबुद्धेहितथासत्वादिभिर्गुणैः॥ नद्यर्मो
नह्यधर्मोवानपुनर्भवजन्मनि॥४१॥ विष
यैरिंद्रियैश्चैवमामेभूयात्समागतः॥ प्रथि
वीपातुमेघ्राणंपातुमेरसनाजलं॥४२॥
चक्षुर्हृतारानंपातुस्पर्शंमेपातुमारुतं॥ रा
शोह्यारामध्येतुचंद्रैवैकारिमर्दनः॥४३॥अ
हंकारश्चमेबुद्धिः लयिबुद्धिः समेतुच॥ वियो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.

गः सर्वकारणगुणैर्भूतैश्चमेभवेत्॥४४॥स
त्वंरजस्तमश्चैवप्रकृतिंप्रविशंतुमे॥साकेव
लप्रदंदेविप्रयातुपरमंतव॥४५॥एकभावो
भवोवास्तुमामेजन्मभवेसुनः॥नमोभगव
तितस्मैविष्णवेप्रभविष्णवे॥४६॥त्वन्मनास्त्व
द्गतःप्राणस्त्वद्भक्तस्त्वत्परायणः॥त्वमेवातुस्म
रेनित्यंमरणेपर्युपस्थिते॥४७॥पूर्वदेहेकृता

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येमेव्याधयस्तेविशंतुमां॥ मर्दयंतुचदुःखानि
ऋणंमेप्रतिमुच्यतां॥४८॥ विनश्यंतुमेरोगा
येमयाः पूर्वसंचिताः॥ अनृणोगंतुमिछामि
तद्विष्णोः परमंपदं॥४९॥ कर्मेंद्रियाणि सं
यम्यपंचबुद्धेंद्रियाणिच॥ दशेंद्रियाणिम
नसित्वहंकारेतथामनः॥५०॥ अहंकारं
तथाबुद्धौबुद्धिंचात्मनियोजयेत॥ जितबु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.

ह्रीद्रियः पञ्चेबुध्याबुध्यः परात्परं॥ माया
पञ्चेतितस्याहं येनसर्वमिदं ततं॥ आत्मना
त्मनिसंयोज्यपरमात्मायमव्यय॥॥५२॥ न
तोबुद्धेपरंबुध्वालभतेनपुनर्भवं॥ नमोभग
वतेतस्मैयेनसर्वमिदं ततं॥५३॥ अहंभग
वतस्तस्यममवासोसुरेश्वरः॥ तस्याहंनप्र
णस्यामिसचमेनप्रणश्यति॥५४॥ ईमामनु

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृतिं दिव्यां वैष्णवीं पापनाशिनीं ॥ स्वप्ने वि
बुद्धः अपठेत्रिसंध्यं चापि यस्मरन् ॥ ५५ ॥ अ
पि पापसमाचारः सोपि याति परं पदं ॥ मरणे
चापि संप्राप्ते त्वयि मिमामनुस्मरन् ॥ ५६ ॥ य
दहंकारमाश्रित्य यज्ञदानतपःक्रिया ॥ कुर्वन्
फलमवाप्नोति पुनरावर्त्तनं यतः ॥ ५७ ॥ अर्च
यन्नपि यो देवान् गृहे वापि बलिं ददन् ॥ जुह्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.

नानुस्मरेद्वापि लभते परमां गतिं ॥५८॥ यज्ञदा
नं तपस्तस्मात्कुर्यादाशाविवर्जितः ॥ पौर्णमा
स्याममायां च द्वादश्यां च विशेषतः ॥ श्रावये
च्छ्रद्दधानेभ्यो ये चान्ये मामुपाश्रिताः ॥ नमइ
त्येव यो ब्रूयात् मद्भक्तः श्रद्धयान्वितः ॥६०॥
तस्याक्षयो भवेल्लोकः श्वपाकस्यापि नारद
किं पुनर्यजसे यो मां साधको विधिपूर्वकं ॥६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्वमेधसहस्राणि यः सहस्रं समाचरेत्
नासौ तत्फलमाप्नोति मद्भक्त्या पदवाप्नुया
त् ॥ ६२ ॥ इष्टं दत्तं तपो धीतं व्रतानि नियमाश्च
ये ॥ सर्वमेतद्विनाशाय ज्ञानं शांतिं न विद्य
ते ॥ ६३ ॥ तस्मात्प्रदेयं साधभ्यः सर्वसत्वाभ
यंकरी ॥ कृत्सां च पृथिविं दद्यान्न तत्तुल्यं क
राचन ॥ ६४ ॥ कांतारे वनदुर्गेषु कृत्ले च भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ०

यसंभवे॥ दस्युभिः संनिरुद्धस्तु नामभिस्त
त्प्रकीर्त्तयेत्॥ ६५॥ जलेरक्षतु वाराहः स्थले
रक्षतु वामनः॥ अटव्यां नारसिंहश्च सर्वतः
पातु केशवः॥ ६६॥ सकृदुच्चरितं येन हरिरि
त्यक्षरद्वयं॥ बद्धः परिकरस्तेन मोक्षायगम
नं प्रति॥ ६७॥ तस्मात्त्वमेव देवर्षे ध्यायश्चात्तं
द्वितो हरिं॥ अवाङ्मुखस्ततः सिद्धिं परं द्रक्ष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सितद्रुवं ॥ ६८ ॥ नाहंवसामि वैकुंठेयोगिनां
हृदयेनच ॥ मद्भक्तायत्रगायंतितत्रतिष्ठामि
नारद ॥ ६९ ॥ वैवेशंपायनउवाच ॥ एवंसदे
वदेवेननारदेनप्रबोधितः ॥ चकारकेशवे
भक्तिंतस्मात्वंकुरुभूपते ॥ ७० ॥ संसारएव
सीमंतोयः स्वानांकिलकथ्यते ॥ नद्ध्याय
तियोदेहीकथयामिचतत्सुखं ॥ ७१ ॥ सर्वबं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.

धविनिर्मुक्तः पदंगछंत्यनामयं॥एवंप्रयुक्तः
पुंनीवपठतीहचनित्यशः॥७२॥ इतिश्रीमा
हाभारतेशतसहस्रसंहितायांवैय्यासिकां
विष्मुधर्मोत्तरेअनुस्मृतिंसंपूर्णः॥ ॥०॥

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.20 12:45
,TRANSFERRED=2020/07/24 at 12:48:57
,PAGES=23
,TYPE=STD
,NAME=S0003370
,Book Name=M-2654-ANUSMIRITI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection